कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



2605

हिबुके चतुर्थे प्रवासी ग्रहप्रविष्टो न वेति वाच्यः ॥ अयमर्थः ॥ चतु
र्थस्थाने शुभग्रहयुतदृष्टे पापैर्युतदृष्टे प्रविष्टः ॥ तत्र दिनैर्विधिर्य
दा चतुर्थे ग्रहस्तस्मिन्समये वाच्यः ॥ अथवायं प्रवेशं करिष्यति
तदा वाच्यः ॥ २ ॥ यइति ॥ यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्या
त्तस्य तस्यास्ति वृद्धिः ॥ पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छ
तो जन्मतो वा ॥ यो भावः स्वामिसौम्ययुतदृष्टस्तस्य वृद्धिर्यस्य हा
निर्नेवाच्या ॥ केनोमिस्याह पृच्छतां प्रश्नकर्तॄणां जन्मतः जन्मकाल
तो वा ॥ ३ ॥ सौम्य इति सौम्ये विलग्ने यदि वा स्ववर्गे शीर्षोदये सि
द्धिमुपैति कार्यं ॥ अतो विपर्यस्तमसिद्धिहेतुः कृच्छ्रेण संसिद्धिक
रं विमिश्रं ॥ ४ ॥ टीका ॥ सौम्ये शुभग्रहे लग्नवर्तिनि सति अथवा शु
भग्रहस्य षड्वर्गे लग्नवर्तिनि सति ॥ यद्वा लग्ने शीर्षोदये इति कार्यसि

Rec. NO. ~~2605~~ M-1801
Title - ① षट्पञ्चाशिका
② अल्पाताः
Author - पृथुयशस्, टी :- दामोदर दैवज्ञ
(रघुनाथसुत)
Date - शके 1698
Subject - ज्योतिष
folio - 25
Xerox - 50

K K S U LIBRARY
RAMTEK
441 106
M-1801
Dist Nagpur

Checked 2012

८

।।द्विर्वाच्या मिथुनसिंहादिचत्वारः कुंभश्च शीर्षोदयः अतः औँविप
।।र्यस्तं नाम पापे विलग्ने यदि वा पापस्य वर्गे पृष्ठोदये इदं कार्यसिद्धेरका
।।रणं विमिश्रं नाम शुभपापौ लग्नगतौ यद्वर्गे शुभपापयोः शी
।।र्षोदये पापखेटः सौम्यः पृष्ठोदये यदा शीर्षोदये पापवर्गः सौ
।।म्यवर्गस्तु पृष्ठगः एवं चेत् कृच्छ्रेण दुःखेन कार्यसिद्धिः स्यात् ४
।।होरेति होरास्थितः पूर्णतनुः शशांको जीवेन दृष्टो यदि वा सिते
।।न शीघ्रं प्रनष्टस्य करोति लब्धिं लाभोपयातो बलवान् शुभश्च
।। ५ टीका होरालग्नं तत्रस्थः पूर्णचंद्रः गुरुभृग्वेन्यतरदृष्टः क्षि
।।प्रं लाभं करोति अथवा एकः कश्चिच्छुभग्रहः सबलो लाभगः क्षि
।।प्रं लाभं करोति ५ स्वोच्चइति स्वोच्चे विलग्ने यदि वा त्रिकोणे स्वो
।।च्चस्थितः पश्यति धातुचिंता परांशकस्थश्च करोति जीवं मूलं प

८

Checked 2012

रांशोपगतः परांशः ॥ ६ ॥ टीका ॥ कश्चिद्ग्रहः स्वांशे स्वनवमांशे स्थितः लग्नवर्त्तिनं ॥ अथवा नवमभाववर्त्तिनं यद्वा पंचमभाववर्त्तिनं स्वनवमांशं पश्यति तदा धातुचिंता वाच्या ॥ यः कश्चिद्ग्रहः परनवमांशे स्थितः लग्नवर्त्तिनमथवा नवमभावं पश्यति तदा जीवचिंता वाच्या ॥ यः कश्चिद्ग्रहः परनवमांशे स्थितः ॥ लग्नवर्तिनमथवा नवमभावं यद्वा पंचमभावं गं स्वनवमांशं पश्यति यदा जीवचिंता वाच्या ॥ एवं यः कश्चिद्ग्रहः परनवमांशस्थः लग्नवर्त्तिनं त्रिकोणवर्त्तिनं वा अन्यनवांशं पश्यति तदा मूलचिंता वाच्या ॥ सुवर्णादि मृत्तिकांतं धातुद्रव्यं ॥ पुरुषादि पिपीलिकांतो जीवः ॥ वृक्षादितृणांतं मूलं ॥ तत्र जीवचिंतायां राशिवशात् द्विपद चतुष्पदादयः कल्प्याः धातुचिंतायां स्वर्णेत्यादिना धातुवर्णो वाच्यः ॥ मूलवसजलनि

६

र्जलराशिवत्रा दाईश्चुष्ठूं च ज्ञेयं॥ धातुमिति॥ धातुमूलं जीवमि
त्योजराशौ युग्मे विंद्यादेतद्देवप्रणीपालमेयं शास्त्रस्त्र माद्दगल्पमे
वसंक्षेपोयं विस्तरार्थस्य भेदः॥७॥ टीका॥ ओजराशौ विषम
राशौ लग्नेयः नवमांशाः तस्य क्रमात्॥ धातुर्मूलं जीव इति गण्ये
अयमर्थः॥ विषमराशेः प्रथम नवांशे धातुचिंता॥ द्वितीय नवमां
शे मूलस्य चिंता॥ तृतीये जीवस्य एवं पुनश्च तुर्थे धातुः पंचमे मू
लं षष्टे जीवः॥ सप्तमे धातुः॥ अष्टमे मूलं॥ नवमे मूल इति॥ युग्म
राशौ इदं तृतीयं विलोमे ज्ञेयं॥ अयमर्थः॥ समराशौ प्रथम नवमां
शे जीवचिंता॥ द्वितीये मूलं॥ तृतीये धातुः॥ एवमग्रेपि॥ टीकांतरं
ओजराशौ यदा प्रथमे द्रेष्काणस्तदा धातुचिंतां प्रवदेत्॥ द्वितीये
द्रेष्काणे मूलं॥ तृतीये द्रेष्काणे जीव इति॥ युग्मराशौ प्रथमे द्रेष्काणे जी

६

व:॥ द्वितीये द्रेष्काणे मूलं॥ तृतीये द्रेष्काणे धातुमिति॥ लग्ने योंशमि
ति॥ अयं मया संक्षेपेणोक्तः॥ विस्तरादस्य प्रभेदा वक्ष्यंते॥ ७॥
॥ इति दामोदरदैवज्ञनाषट्पंचाशिकायां प्रकाशे संक्षेपहेप
ध्याय:॥ छ॥ वृषसिंहवृश्चिकघटैरढिस्थाने गमागमौ न स्त:
न मृतं न चापि नष्टं न रोगशांतिर्न चाभिभवः॥ ८॥ वृषसिंहवृ
श्चिककुंभलग्ने स्थानं विद्धि गमागमनं न भविष्यति वा न वेति प्र
छायां स्थितं वदेस्यर्थः॥ तदेवाह॥ गमागमौ न स्त इति रोगिणोमृ
स्कप्रश्ने नमस्कारो गिणं वदेत्॥ उव्यादेर्नष्टप्रश्ने अनष्टद्रव्यं वदे
तें॥ अथ ज्वरादिरोगनिवृत्तिः स्याद्वा न वेति प्रश्ने न रोगशांतिः
अथ शत्रोः सकाशात्पराजयो भविष्यति न वेति प्रश्ने पराजयो न
स्यात्॥ ९॥ तदिति॥ तद्विपरीतं तु चरैर्द्विशरीरैर्विमिश्रितं फलं भ



१०

वति॥ लग्नेंदोर्वेक्ष्यं स्युः शुभाः शुभदृष्ट्या शोभनमतोन्यत्॥ ६॥ टीका
॥ चरैः चरराशिभिर्लग्नगतैरिंदुः सर्वं फलं विपरीतं ज्ञानी॥ हि द्विश
रीरैर्द्विस्वभावराशिभिः लग्नगतैर्मिश्रितं फलं भवति॥ पूर्वार्द्धे स्थि
रवत्॥ उत्तरार्द्धे चरवदिति॥ इदं सर्वं प्रश्नोक्तं फलं लग्नेंद्वोः शुभदृ
ष्ट्या शुभग्रहावलोकनेन वाच्यं॥ अतः अन्येव नो मूलग्नेंद्वन्यपाप
ग्रहदृष्टौ तदा अशोभनं वाच्यं॥ लग्नचंद्रलयोरन्यतरे पापयुतदृष्टे
मध्यं फलमिसर्थसिद्धिः॥ ६॥ सुतेति सुतशत्रुगतैः पापैः शत्रुमा
गान्निवर्त्तते॥ पापैश्चतुर्थगैः प्राप्तः शत्रुभंगो निवर्त्तते॥ ९॥ टी
का॥ सुते पंचमे शत्रुः षष्ठं तत्रस्थैः पापैः प्रष्टुः शत्रुर्मार्गादागत्य
गच्छति॥ चतुर्थगैः पापैः शत्रुः युद्धे पराजयं प्राप्य गच्छति॥ १०
रसवेति॥ छषालिकुंभकर्कटारसातले यदि स्थिता॥ रिपोः प

१०

राजयस्तदा चतुष्पदैः पलायनं ॥ टीका ॥ मीनवृश्चिककुंभकर्की:
यदा लग्नाच्चतुर्थस्थाने भवेत्ति तदा शत्रोः पराजः ॥ चतुष्पदैः
मेषवृषसिंहधनुः पूर्वार्द्धगैः चतुर्थगैः स्तदा शत्रोः पलायनं
भवति ॥ ११ ॥ चरेति ॥ चरोदये शुभस्थितः शुभं करोति यायि
नां ॥ अशुभ नैरशुभं स्थिरोदये पि वा शुभं ॥ १२ ॥ टीका ॥
चरलग्ने शुभग्रहयुक्ते यायिनां शुभं ॥ विपर्यये पापग्रहयुक्ते
विपर्ययमशुभं ॥ स्थिरोदये पापयुक्ते वा शुभं ॥ अयमर्थः ॥ तस्या
ने पापग्रहस्य क्षेत्रे उच्चे मूलत्रिकोणे ॥ मित्रगृहे भवति तदा शु
भं ॥ अन्यथा अशुभमिति ॥ १२ ॥ स्थिरेति ॥ स्थिरे राशौ चरोद
ये न चागमो रिपोर्यदा ॥ तदागमं रिपोर्वदे द्विपर्यये विपर्ययः ॥
॥ १३ ॥ स्थिरराशौ चंद्रे सति चरराशौ लग्नगते सति रिपोराग

7

११ नंयद्यपिनभ्रूयतेतथापिरिपोरागमनंवदेत्॥ विपर्ययंनाम॥ च
रराशौचंद्रेस्थिरलग्नेयद्यपिरिपोरागमनंतथाप्यागमनंनस्या
त्॥ अयंविपर्ययः॥१३॥ स्थिरइति॥ स्थिरेतुलग्नमागतेद्विरात्मके
तुचंद्रमाः॥ निवर्ततेरिपुस्तदासुदूरमागतोपिसन्॥१४॥ स्थिर
राशौलग्नगतेसति॥ चंद्रेद्विःस्वभावेराशौसतितदास्वस्थानात्
सुदूरमतिदूरमागतोपिरिपुर्निवर्ततेगच्छतीत्यर्थः॥१४॥ चरइति
८ २ चरेराशौलग्नगतेद्विदेहःपथार्धमागत्यनिवर्ततेरिपुः॥
विपर्ययेत्वागमनंद्विधास्यात्सराजयःस्यादशुभेक्षितेतु॥१५॥
टीका चरराशिगश्चंद्रः लग्नंद्विःस्वभावं अस्मिन्योगेरिपुः॥
अर्द्धमार्गमागत्यपश्चान्निवर्ततेविपर्ययेनामद्विःस्वभावेचं
द्रः लग्नंचरंतदाद्विधाआगमनंस्यात्॥ रिपुःसेनाद्वयेनलाआ।

११

गच्छेदित्यर्थः॥ विपर्यययोगे अशुभेक्षिते नामहिः स्वभावगर्थ्ये
द्रे पापदृष्टे चरलग्ने च पापदृष्टे तत्र शत्रुः पराजयः स्यात्॥१५॥ अर्की
कीर्ति॥ अर्की किल सितानामेकोपि चरोदये यदा भवति। प्रवदेत्तं
दाशुगमनं वक्रगते नैति च वक्तव्यं॥१६ टीका॥ चरोदये चरलग्ने
रविशनिशुक्रान्यतरतमः एकोपि यदा चरोदये भवति तदा शत्रो
रागमनं वदेत्॥ सः ग्रहः वक्री चेत्तदा शत्रोरागमनं न स्यात्॥१६॥
स्थिरोदये जीवशनैश्चरे स्थिते गमागमौ नैव वदेत्सु पृच्छकः॥
त्रिपंचषष्ठारिपु संगमापगा पापाश्चतुर्थाविनिवर्त्तमाया॥१७॥ स्थि
रलग्ने जीवशनैश्चराभ्यां दृष्टे सति पृच्छतः पृच्छकस्य गमागमौ न
भवत इति वदेत्॥ स्थिरलग्ने जीवशनिदृष्टे तस्माच्चतुर्थस्थाने चे
त्पापास्तदा शत्रोर्निवर्तनाय पराचन्ने स्युः॥१७॥ नेति॥ नागच्छ
ति परचक्रं यदार्कचन्द्रौ चतुर्थभवनस्थौ॥ गुरुबुधशुक्रा हिबु

केपद्रातदाशीघ्रमायाति॥१८॥टीका॥यदासूर्यचंद्रौलग्नाच्चतुर्थस्था
नस्थौतदापरचक्रंनागच्छति॥लग्नाद्धिबुके चतुर्थस्थानेचंद्रबुध
शुक्रास्तदापरचक्रंशीघ्रमायाति॥१८॥मेषेति॥मेषवृषधन्विसिं
हायद्युदयस्थाभवंतिहिबुकेवाशत्रुर्निवर्ततेतदाग्रहसहितावा
विमुक्तावा॥१९॥टीका॥ग्रहसहितःग्रहरहितोवामेषवृषधनुःसिं
होन्यतरोरात्रिवीर्येदिलग्नगतोभवति॥अथवालग्नाच्चतुर्थस्थान
गोभवतितदाशत्रुर्निवर्ततप्रयातीयर्थः॥१९॥यइति॥ग्रहःस
र्वोत्तमबलोलग्नाद्यस्मिन्गृहेस्थितः॥मासैस्तत्तुल्यैःसरव्याकैर्नि
वृत्तिर्यातुरादिसेत्॥२०॥टीका॥सर्वग्रहेभ्यःयोग्रहोबलीलग्नत
यस्मिन्स्थानेस्थितःतत्तुल्यमासेर्यातुःप्रवासंगच्छतः॥निवर्त
नमादिसेत्॥२०॥स्थिरेति॥स्थिरराशौयद्युदयेशनिगुरुर्वास्थि
तःस्तदाशत्रुः॥उदयेरविगुरुर्वाचरराशौस्यात्तदागमनं॥२१

टीका॥ उदयलग्ने यदा स्थिरराशिर्भवति। तत्र स्थितः॥ शनिगुरुर्वा भवति तदा रोगश्चिरस्थितः रोगो न गच्छतीत्यर्थः॥ अथ चरराशौ लग्नगते तत्रस्थः रविगुरुर्वा भवति तदा राशौ रोगागमनं स्यात्॥ २ चरांशस्थे ग्रहे तस्मिन् कालमेतं च निर्दिशेत्॥ द्विगुणं स्थिरभागस्थे त्रिगुणं द्व्यात्मकांशके॥ २॥ टीका॥ पूर्वश्लोके यो आगमनसमय उक्तः॥ सर्वोत्तमबलग्रहे चरराशिनवांशे रोगे सति। स्थिरराशिनवांशे रोगे द्विगुणं॥ द्विस्वभावराशिनवमांशे रोगे त्रिगुणमिति॥ २२ यातुरिति॥ यातुर्विलग्नाद्यामित्रभवनाधिपतिर्यदा करोति वक्रमावर्त्तैः कालं तं ब्रुवते परे॥ २३॥ टीका॥ यस्मिन्लग्ने प्रयातः तस्माल्लग्नात् सप्तमस्थानस्य यः स्वामी स यदा वक्री भवति तदा यातुरायाति॥ इति परे ह्याचार्यादयः कथयन्तीत्यर्थः॥ २३॥ उदयेति ॥ उदयर्क्षाच्चन्द्रर्क्षं भवति यावद्दिनैश्च तावद्भिः॥ आगमनं स्याच्छ

॥१२॥

चोर्यदिमध्ये न ग्रहः कश्चित्॥२४॥टीका॥ उदयक्षाल्लग्नात् चंद्रा
धिष्ठितराशिर्यत्संख्याको भवति तावद्भिर्दिवसैः चोत्तुरायाति
परं लग्नचंद्रांतराले कश्चिद्ग्रहो न चेत्॥२४॥ इति दामोदर
दैवज्ञकृतषट्पंचाशिकायां गमागमाध्यायः॥ छ॥ छ॥ ध
दशमोदयसप्तमगाः सौम्याः नगराधिपस्य विजयकराः॥ आ
रार्किज्ञगुरुः सिताप्रभंगदा विजयकरा नवमे॥२५॥टीका॥ दश
मलग्नसप्तमस्थानस्थिताः सौम्यग्रहाः नगराधिपस्य स्थायि
नः विजयकराः॥ भौमशनी पश्चलग्नान्नवमस्थानस्थितौ
प्रकर्षेण प्रभंगदौ॥ पश्चलग्नान्नवमे चेद्बुधगुरुशुक्रास्तदा
विजयदास्तस्य प्रष्टुर्विजयदाः॥२५॥ पौराइति॥ पौरास्तृतीयभ
वनाद्धर्माद्वायायारिनः शुभैः शुभदाः॥ व्ययदशमोदयेपापाः

॥१२॥

पुरस्यनेष्टाशुभायालुः॥२५॥ धीको लग्नाच्चतृतीयस्थाने तस्माद्राशि
षड्कस्यपोरसंज्ञा॥ धर्मो लग्नाच्च नवमस्थाने तस्माद्राशिषड्कस्यस्था
यिसंज्ञा ते राज्ञायः शुभैर्युक्ता शुभदा अयमर्थः॥ पौरस्थानस्थाः
शुभाः॥ पौराणां शुभाः॥ यायिस्थानस्थाः शुभाः॥ यायिनां शुभाः
अर्थात्पापाः अशुभाः॥ शुभपापमिश्रिता मध्यमाद्व्यर्थसिद्धिं द्वि
दशादशमेकादशगाः पापाः नगरस्य नेष्टाः यायिनः शुभाः
॥२६॥ द्व्यराशीति॥ द्व्यराशिसंस्था हृदये शुभाः स्युः व्ययायसंस्था
श्चयदा भवंति॥ तदा सुसंधिं प्रवदेन्नृपाणां पापैर्हृदिलोपगतैर्विरो
धं॥२७॥ टीका॥ शुभाः शुभग्रहाः॥ यदि द्व्यराशौ ये॥ मिथुनतुल
कन्याः तत्रस्थाः भवंति॥ अथवा लग्नगता भवंति यद्वा द्वादशौका
दशगा भवंति तदा परस्परस्य विरोधिनां नृपाणामाशुदीर्घं संधि
मेललं प्रवदेत्॥ यदा सर्वे पापग्रहाः द्विःस्वभावराशिगास्तदावि

13

१५

रोधं वदेत्॥ सौम्याः केचित् नरा त्रिषु स्थिताः॥ केचित्पापाः द्विस्वक्षा
वरा त्रिस्थास्तत्स्य तां प्रवदेत्॥ २७॥ केंद्रेति॥ केंद्रोपगताः सौम्याः
सौम्यैर्दृष्टान्लग्नगाः॥ प्रीतिं कुर्वंति पापाः दृष्टापापास्तथैव विपरी
तं॥ २८॥ टीका॥ शुभग्रहाः नरा त्रिषु स्थिताः॥ पुनः केंद्रगाः पुनः
शुभैर्दृष्टाश्च परस्परं प्रीतिं कुर्वंति॥ एवं नरा त्रिस्थाः पुनः पाप
दृष्टाः एवंविधाः पापाश्च विपरीतं कुर्वंति वैरकरा भवंतीत्यर्थः
॥ २८॥ द्वितीयइति॥ द्वितीये वा तृतीये वा गुरुः शुक्रो यदि तदा॥ आश्वे
वायाति वै सेनाप्रवासी वा न संशयः॥ २९॥ टीका॥ गुरुः शुक्रो द्विती
ये वा तृतीये चेद्भवतस्तदा सेनाश्वेवायाति॥ गुरुः द्वितीये भृगु
स्तृतीये॥ गुरुस्तृतीये अथवा द्वावपि द्वितीये तृतीये वा तत्रापि
रग्रहयोगदृष्टौ ससामि ससैन्यो सेनायाति चेत्तदा पन्नायपंथात
तथेति पदं॥ २९॥ इति दामोदरकृत षट्पंचाशिकाटीकायां ज

१५

यपराजयाध्यायस्तृतीयः ॥ छ ॥ छ ॥ केंद्रेति ॥ केंद्रत्रिकोणेषु
शुभ ॥ स्थितेषु पापेषु केंद्राष्टमवर्जितेषु ॥ सर्वार्थसिद्धिं प्रवदन्ति नरा
णां विपर्ययस्थेषु विपर्ययः स्यात् ॥ १० ॥ टीका ॥ केंद्रत्रिकोणेषु शुभ
ग्रहेषु पापग्रहेषु केंद्राष्टरहितेषु नराणां सर्वार्थसिद्धिं प्रवदंति ॥ वि
पर्यये विपरीतं वदेत् ॥ अयमर्थः ॥ केंद्रत्रिकोणेषु पापेषु शुभे केंद्रा
ष्टरहितेषु कार्यसिद्धिं वदेत् ॥ १० ॥ तृतीयेति ॥ त्रिपंचलाभास्तम
येषु सौम्या लाभप्रदा नेष्टफलाश्च पापाः तुलाथ कन्या मिथुनं
घटश्च नराश्रयस्तेषु शुभं वदंति ॥ ११ ॥ टीका ॥ तृतीयपंचमैकाद
शसप्तमयेषु शुभाः प्रकृष्टलाभदा ॥ एष्वेव पापाश्च हानिकराः ॥
तुलाकन्यामिथुनकुंभाः नराश्रयः तेषु लग्नगतेषु सौम्यग्रहा
धिष्ठितेषु शुभं स्यात् ॥ ११ ॥ स्थानेति ॥ स्थानप्रदा दशमसप्तम

९५

गाश्चसौम्यामानार्थदाः स्वसुतलग्नगता भवंति पापाश्चयायसहि
ता नशुभःप्रदाः स्युः लग्नेशशीनशुभदो दशमे शुभश्च ३२ टीका
दशमसप्तमगाः सौम्याः पुष्टुः स्थानप्रदा भवंति सौम्याद्वितीयपंच
मलग्नगतामानप्रजा अर्थादि व्यंतु सदा भवंति पापाः एकादशगाः द्वा
दशगाः नशुभदाः लग्नगतश्चंद्रोपि नशुभदः दशमस्थाने एकोपि
पापः नशुभः ३२ इंदुमिति इंदुद्विसप्तदशमायरिपुत्रिसंस्थपत्ये
न्दुलः शुभफलंप्रमदाह्वलंस्यात् लग्नत्रिधर्मसुतेने धनगास्तु पापाका न८
र्यार्थनाशभयदाः शुभदाः शुभाश्च ३२ द्वितीयसप्तमैकादशषष्ठतृ
तीयस्थानस्थितगुरुश्चेत्स्यात् तदा प्रमादास्त्रीतद्वाराशुभफलंभ
वतीतिस्त्रीद्वाराकार्यंस्यात् लग्नतृतीयनवपंचमाष्टमताः कृत
स्यकार्यस्यद्रव्यस्यच नाशंकुर्वंति एतेषु लग्नादिषु शुभग्रहा

९५

श्चेत्तदाशुभाः २२ शुभेति शुभग्रहाः सौम्यनिरीक्षिताश्चवि
लग्नसप्ताष्टमंपंचसंस्थाः त्रिषड्दशायेषु निशाकरः स्यात्शुभं
भवेद्रोगनिपीडितानां २४ टीका शुभग्रहाः लग्नसप्ताष्टमपं
चमस्थानस्थिताः पुनः सौम्यग्रहदृष्टाः चंद्रश्चेत्तृतीयषष्ठद
शमैकादशस्थः स्तदारोगिणांशुभंवदेत् कुत्रचित्पुस्तकांतरे
पक्षेयोदृष्टायथा पापर्क्षेप्यलग्नेतुपापसंतवीक्षिते तथै
वचाष्टमस्थाने रोगिणांमरणंवदेदिति ॥२४॥ इतिजानकी
५ रघुनांसुतदामोदरदैवज्ञकृतपद्मपंचाशिकाटीकायांशु
भाशुभलक्षणाध्यायः ॥छ॥छ॥छ॥४॥ दूरेति दूरगतस्याग
मनंसुतधनसहजस्थितैर्ग्रहैर्लग्नात् सौम्यैर्नदृष्टमथवासितलग्नोगम
नंगुरुसिताभ्यां २५ पंचमद्वितीयतृतीयेषु सर्वग्रहैः स्थितैः दूरग
तस्यागमनंभवति एवंवस्थानेषुचेत्सर्वेसौम्यग्रहाः स्थितास्तदा

17



२६

प्रवासेस्थितस्यपुरुषस्य नष्टद्रव्यैः सहारामं भवतीसर्थः पूर्वोक्ते
स्थानान्यतस्थानेयदिगुरुसितौतदाप्रवासिनः लघुसीघ्रमागमनं
स्यात् २५ जामित्रइति जामित्रेष्वथवाषष्ठेग्रहाः केंद्रेषुवाक्पतिः
प्रोषितागमनंविंद्यात्त्रिकोणेज्ञेसितेवा २६ टीका सप्तमषष्ठेस्था
नेलग्नाद्यः कश्चित्ग्रहोभवतिकेंद्रेगुरुस्तदाप्रोषितागमनंविंद्यात्
अथवाषष्ठसप्तमयोः कश्चिद्ग्रहः बुधशुक्रयोरन्यतमस्त्रिकोणेअ
थवाज्ञेतदापिप्रोषितागमनंवदेत् २६ अष्टमस्थइति अष्टम
स्थेनिशानाथेकंटकैःपापवर्जितैः प्रवासीसुखमायातिसौम्ये
लानसमन्वितः २७ टीका लग्नादष्टमस्थानेचंद्रः पापग्रहेषुकें
द्ररहितेषुप्रवासीसुखेनायाति पूर्वोक्तयोगएवसौम्याः केंद्रगता
स्तदाप्रवासीलाभयुक्तोआयाति २७ दृष्टोदयेपापनिरीक्षितेवा
पापास्तृतीयेरिपुकेंद्रगेवा सौम्यैरदृष्टा वधबंधदास्युः नेष्टामृता

१६

मुषितास्तु वा स्युः ॥२५॥ दृष्टोदये लग्नगे पापग्रहदृष्टे प्रवासिनो
वधस्ताडनबंधो बंधनं वाच्यं ॥ मेषवृषकर्कधनुमकरमीनाः पृष्टो
दयाः ॥ अथवा सर्वेपि पापाः तृतीये सौम्यग्रहैरदृष्टस्तदा प्रवासिनो
नष्टा मृता ॥ वाच्याः ॥ अथवा पापाः षष्ठकेंद्रगतास्तदा प्रवासिनो
नष्टा अतिदुःखिता मुषिताश्चौरैरपहृतसर्वस्वाश्च ज्ञेयाः ॥२८॥
॥ग्रह इति॥ ग्रहो विलग्नाद्यलमे ग्रहे तु तेनाहताद्द्वादशराशयस्तु
॥ तावद्दिनान्यागमनस्य विंद्यान्निवृत्तनं वक्रगते ग्रहैस्तु ॥२॥ टी
का॥ लग्नाद्यः कश्चिद्ग्रहः समीपे स्थितः स यस्मिन् गृहे स्थितः तेन प्र
माणेन द्वादशराशयो गुण्याः एवं कृते यः अंकः उत्पद्यते भवंति दिना
नि आगमनस्य स्थितदेशाच्चलितस्य पृच्छकदेशागमनपर्यंतं भव
तीत्यर्थः ॥ ननु स्वदेशात्कदा चलिष्यतीति तदाह ॥ ग्रहलग्नात्समीप

७

स्य यदा वक्री भविष्यति तदा असौ चलिष्यति ॥ ततो गणितागत दिने
स्वस्थाने आयातीत्यर्थः ॥ ४६ ॥ इति प्रवासाध्यायः ॥ छ ॥ ५ ॥ छ ॥
स्थिरेति ॥ स्थिरोदये स्थिरांशे वा वर्गोत्तमगते पि वा ॥ स्थितं तत्रैव
तद्द्रव्यं स्वकीयेनैव चोरितं ॥ ४७ ॥ टीका ॥ प्रश्ने स्थिरलग्ने सति अथवा
यस्य कस्यचिद्राशे उदये स्थिरांशे सति अथवा वर्गोत्तमे सति ॥ तदा द्रव्यं
स्वकीयेनैव चोरितं ॥ तत्स्थाने एवास्थितं ज्ञेयं ॥ ४७ ॥ आदीति ॥
आदिमध्यावसानेषु द्रेष्काणेषु विलग्नतः ॥ द्वारदेशे तथा मध्ये गृहांते वा
वदेद्धनं ॥ ४८ ॥ लग्ने प्रथमद्रेष्काणे सति धनं द्वारदेशे वदेत् ॥ अयम
र्थः ॥ गृहस्य भागत्रयं कुर्यात् ॥ तत्र द्वारासन्नो भागो द्वारदेशः ॥ द्वितीय
द्रेष्काणगे लग्ने ॥ मध्यदेशो गृहस्य मध्यभागः ॥ तृतीये द्रेष्काणगे लग्ने गृ
हांते गृहस्याभ्यंतरतृतीयभागे इत्यर्थः ॥ ४८ ॥ पूर्णेति ॥ पूर्णः शशी लग

७

ग्नगतः शुभो वा शीर्षोदये सौम्यनिरीक्षितश्च॥ नष्टस्य लाभं कुरुते
तदा शुभलाभोपयातो बलवान् शुभश्च॥ ४२॥ टीका॥ पूर्णः चंद्रः लग्नग
तः शुभग्रहदृष्टः॥ अथवा शीर्षोदये लग्ने शुभग्रहेण शुभैर्वा वि
लोकितश्चेन्नष्टद्रव्यस्य लाभं कुरुते॥ अथवा सर्वग्रहेभ्यो बली शुभ
ग्रहः एकादशगतस्तथापि लाभं कुरुते॥ ४३॥ दिगिति दिग्वाच्या कें
द्रगतैरसंभवे वा वदेद्विलग्नर्क्षात् लाभस्थाच्युतेर्विलग्नान्नवांशकैर्यो
जना वाच्या॥ ४४॥ टीका॥ केंद्रे यः कश्चिद्ग्रहः भविष्यति तस्य यावद्दिव
ग्नान्नष्टद्रव्यस्य वाच्या॥ यदि केंद्रे ग्रहद्वयं त्रयं वा तदा बलिनो दिग्वा
च्या॥ केंद्रग्रहरहिते सति लग्नाद्दिग्बलं लग्नांशो दिग्वाच्या इत्यर्थः
विलग्नान्मध्याच्युतेः रंशैः नष्टद्रव्यस्य योजनसंख्या वाच्या॥ अय
मर्थः॥ प्रश्नलग्नोदितनवांशात् स्वचभावोदितनवांशो राशिगण

१८

नयायत्संख्याको भवतीति तत्संख्यानियोजमानिवाच्यानीत्यर्थः॥
४३॥ इति दामोदरदैवज्ञकृतषट्पंचाशिकाटीकायां नष्टवस्तुप्र
श्नाध्यायः॥छ॥६॥छ॥ विषमइति॥ विषमस्थेर्के पुत्रे सुतस्यज
न्मांगनायाश्च॥ लग्नाद्वरस्य नारीसमस्थिते वान्यथा वा॥४४॥टी
का॥ लग्नाद्विषमस्थानगेर्के पुत्रे पुत्रजन्म समस्थानगकन्यायाः॥ वि
वाहप्रश्ने लग्नाद्विषमस्थानगेऽर्के पुत्रे नावरस्य कन्यालग्नानान्य
स्या॥४४॥ गुर्वीति॥ गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदनायारिगः शशी
लग्नात्॥ भवति विवाहकर्ता त्रिकोणकेंद्रेषु वा सौम्याः॥४५॥टीका॥
चंद्रः लग्नात्त्रिपंचसप्तमैकादशषष्ठस्थः गुरुः सूर्यबुधदृष्टश्चेद्वि
वाहकरो भवति॥ अथ शुभग्रहः त्रिकोणकेंद्रान्यतरस्थः स्तदापि वि
विवाहः॥४५॥ चंद्रार्कयोरिति॥ चंद्रार्कयोः सप्तमगो सितार्कैरसु

१८

रवेष्टमेवापि तथा विलग्नात्॥ द्वितीयदुश्चिक्यगतो यदा वा वर्षासु
वृष्टिं प्रवदेद्विलग्नात्॥ ६॥ टीका॥ चंद्रसूर्ययोः सप्तमगे॥ गुरुरा
नौ अथवा लग्नाच्चतुर्थाष्टमे गो यद्वा विलग्नो द्वितीयतृतीयगो एवं यो
गे वृष्टिप्रश्ने सति तदा वर्षाकाले वृष्टिं वदेत्॥४६॥ सौम्याद्दृति॥ सौ
म्या जलराशिरथास्तृतीयधनकेंद्रगाः सिते पक्षे॥ चंद्रे वाप्युदये ग
जलराशिस्थे वदेद्वर्षा॥४७॥ टीका॥ सौम्यग्रहाः जलराशिगाः ल
ग्नात्तृतीयगाः॥ तदा शुक्लपक्षे वृष्टिं वदेत्॥ अथवा लग्नगे चंद्रे
जलराशिस्थे तदा वृष्टिं वदेत्॥ तुलागोः कर्कालिमकरघटमीनाः
जलयुता तथा अन्ये ये जलराशयः इति मता वरिदहिताः॥४७॥ पुंवर्गे
नि॥ पुंवर्गे लग्नगते पुंग्रहदृष्टे बलान्विते पुरुषः॥ युग्मे स्त्रीग्रहदृष्टे स्त्री

५६

23

१५

बुधयुक्तेतु गर्भयुक्ता ४८ टीका पुरुषराशिषु तद्दृग्लग्नगते सति २२
लग्ने च पुंग्रहावलोकिते सति पुनर्लग्ने सबले सति पुंसो भवति वि
षमाः पुंराशयः रविभौमगुरवः पुंग्रहाः अधिपयुतदृष्टबुधयुरयु
तद्दृष्टो राशीवले लग्ने युग्मे सति स्त्रीग्रहावलोकिते सति कन्यास्या
त् यदि लग्ने बुधयुक्ते तदा स्त्री सगर्भा वर्त्तते अद्यापि न प्रसूते सर्थः ४८
कुमारिमिति कुमारिकां बालशशी बुधश्च वृद्धां शनिः सूर्यगुरू प्रसू
तां स्त्रीकर्कशां भौमसितौ विधत्ते एवं वयः स्यात्सुरुषेषु चैवं ४९ टीका
शुक्लप्रतिपदामारभ्य दशमीपर्यंतं बालचंद्रः सबालचंद्रः सबलोल
ग्नस्थः अथ बालसंपश्यति तस्पृष्ट्वेलसि कुमारिका वर्त्तत इत्यर्थः
एतादृशोऽपि बाल एवं ज्ञानावेतादृशो वृद्धार्कि विगुरुप्रसंयुक्ता भौ
मेशुक्रोऽर्कशां एवं वयः पुरुषचिंतायामपि ज्ञेयं ४९ आसेति

आत्मसमं लग्नगतैस्तृतीयगैर्भ्राता सुतस्सुतगैः माता वा भगिनी
वा चतुर्थगैः शत्रुगैः शत्रुः ५० टीका आदित्यादिभिः सबलैर्ग्र
हैः लग्नगतैः प्रष्टुरात्मसमं किंचिन्मनसि वृत्तं एवं लग्नात्तृती
ये भ्राता पंचमगैः पुत्रः चतुर्थगैर्माता भगिन्योरन्यतरं षष्ठगैः
शत्रुः ५० छिद्रादशास्थितैः खेटैः शशांकाद्वा तु वर्जितैः सुन
फानफाक्रमेणैव ७ भार्येति भार्या सप्तमसंस्थैर्नवमे धर्माश्रि
तो गुरुर्दशमे स्वांशपतिमित्रशत्रुषु तथैव वाच्यं बलयुतेषु ५१
टीका सप्तमगैर्जाया नवमगैर्धर्मयुक्ता चिंता वाच्या दशमे आचा
र्यस्य स्वांशेत्यस्यायमर्थः लग्नोदितनवांशपतौ सबले यद्युक्त
मात्मसममित्यादि तत्स्पष्टं वाच्यं यदि लग्नोदितनवांशपतिस
श्चेत्सबलं तदा आत्मसममित्यादि तत्पृष्टुर्मित्रस्य वाच्यं एवं शत्रो

सबलेत्रात्रो: ५१ चरेति चरलग्ने चरभागे मध्याद्दृष्टेप्रवासचिं
तास्यात् षष्ठ:सप्तमभवानां तु न निवृत्तायदि नवक्री ५२ टी
का प्रश्नो चरलग्नोदये सति चरनवांशे सति कीदृशो चरनवांशे
मध्यात्पंचमनवांशात् षष्ठे च्युते सलग्ने षष्ठनवांशगे सतीत्यर्थः
तदाप्रवासचिंतावाच्या यदि तस्मिन् काले क्रूरग्रहः सप्तमस्था
नाच्चलितः अवक्री चेत्तदाप्रवासी निवृत्त इति वाच्यमित्यर्थः
५२ अस्तइति अस्तरविसितवक्रे परजायास्वपुरेबुधे
वेश्या चंद्रे च वयः शशिवत्प्रवदेत्तासां सजातीयं ५२ टीका
रविशुक्रभौमानामन्यतमे ग्रहे लग्नात्सप्तमस्थे परजाया वा
च्या गुरौ स्वस्यैव बुधे वेश्या चंद्रे च चकारात्साधारणस्त्री जातिः
वयः चंद्रवाच्यं अयमर्थः शुक्लप्रतिपदातो दशमीयं बाल

चेद्भास्तत्र बाला वाच्या ततः कृष्णपंचमी अवधिर्लग्न
स्तत्र तरुणी ततो वृद्धस्तत्र वृद्धा ज्ञानो सप्तमस्थे अंत्यजाताना
कन्या वाच्या ५३ धुर्धुरोभयसंस्थितेः केमद्रुमभवे योगो
द्विव्यय मंदइति मंदः पापसमेतो लग्नान्नवमे शुभैरयुतदृ
ष्टः रोगार्त्तः परदेशो वा छुसगोम्लकर एव ५४ टीका प्रश्नल
ग्नान्नवमे शनिः पापग्रहयुक्तः पुनः शुभैर्युक्तेक्षितश्चेन्नतथो
प्रवासरथो रोगार्त्तो वाच्यः यद्यष्टमे कश्चिद्ग्रहस्तदा प्रवासी म
तो वाच्यः ५४ सौम्यइति सौम्ययुतोर्कः सौम्यैर्दृष्टः श्चाष्टम
र्क्षसंस्थश्च तस्माद्देशादन्यगतः स वाच्यः पिता तस्य ५५
टीका सौम्ययुतोर्कः लग्नादष्टमगः सौम्यदृष्टो वा लग्नादष्ट
मगः तदा पृष्टुः पिता तद्देशं विहायान्यदेशो गत इति वाच्यं ५५

27

अंशकादिति अंशका ज्ञायते द्रव्यं द्रेष्काणैस्तस्कराः स्मृताः राशि
भ्यः कालदिग्देशान्वयोजातिश्चलग्नपात् ५६ टीका अंशकाद्द्रव्यं
ज्ञेयं यथा धातुमूलमित्यादिना धात्वादिकं वाच्यं आरण्यसितेत्यादि
नावर्णो वाच्यः ह्रस्वदीर्घप्लुतत्वे तत्रकुंभाद्याश्चत्वारो ह्रस्वा मिथुना
द्याः मध्याः तुलाद्याः स्थूला इति अंशपतौ सबले न सारं निर्बले
सुचिरं स नीचास्तमिते वा नष्टमप्य इत्यादि द्रेष्काणैस्तस्कराः
चौराः ज्ञेयाः याप्याया हृच्चेष्ट द्रेष्काणस्याकृतिस्ताहृच्चयेववववलो
व्यसव्येस्यर्थः कन्यासितवस्त्रवेष्टितेत्यादिना द्रेष्काणफलयो
ब्रहज्जातके उक्ताः राशिभ्यः कालदिग्देशाः ज्ञेयाः मेषाद्याश्च
त्वार इत्यादिना कालो ज्ञेयः पंचमनवमे सहेत्यादिक ज्ञेया देशो
यथा मेषवाः भूमौ वृषे गोकुले मिथुनेन्त्यस्थाने संयामेषा के

कैंजलसमीपे सिंहेरण्ये कन्यायांनौसमीपे तुलेहदे वृश्चिके
श्वभ्रे धनुषिसंग्रामे भूमौवा मकरेजलसमीपे कुंभेभांडस्था
ने मीनेजलेइति वृद्धः जोतिश्चलग्नपाद्वाच्या यथावयासित
षांस्तनबाल्यअंतस्थिता यौवनवृद्धामध्यवृद्धाअजीववृद्धाइतिचं
द्रभौमज्ञशुक्रवागीशशनैश्चराणां जीवसितौ विप्रसादिनाह्ल
तिर्ह्येया जानकीरघुनाथाभ्यांजातोदामोदरः कृतीतेनेयंरचिता
टीकासुप्रश्नस्यप्रकाशिका ५६ नवबाणद्वयमितोस्वनुष्टुप्
न्नसंख्यया नाभिक्रमेण लिखितोन्यथाखनवविधुभिः ॥६७॥ ६
॥इतिदामोदरदैवज्ञरचितषट्पंचाशिटीकायां सप्तमो
ध्यायः ॥६७॥ शके१६९८ वेषदुर्मुखनामसंवत्सरे अपागयनेहेमंत
ऋतौमार्गशीर्षमासेशुक्लपक्षेतिथौ ७ शुक्रवासरे लिखितमिदंपु

स्तकं अपधानी स्थपनाम श्रीमद्धर्मदेवसुतात्मज नरसिंहदेवस्य सूनुना स
दासिवेन स्वपठनार्थं परोपकारार्थं च ॥ ॥ छ ॥ छ ॥ श्रीगुरुर्जयति
॥ श्रीलक्ष्मीनरसिंहाय नमः ॥ छ ॥ श्रीमहाकाल्यै नमः ॥ श्रीरस्तु ॥

०॥श्रीमंगलमूर्तयेनमः॥ छ॥ अथोत्पाताः लिख्यंते॥ छ॥ छ
स्वभावतोप्यथोत्पातो त्रिविधः परिकीर्तितः दिव्यंतरिक्षभौ
मारव्यो महाभयविवर्द्धनः १ धर्मत्यागेनलोकानांदेवाःक्रो
धंप्रयांतिच विसृज्यंत्यद्भुतावातान् भौमदिव्यंतरिक्षगान्
२ उत्पातस्त्रिविधोलोकेसंभवंतिमहीतले प्रजानांचविना
शायस्वरूपंबोधयंतिच ३ राहुकेतुग्रहोत्थंचचंद्रताराक
संभवं दिव्यसंज्ञंचकथितंयच्चान्यज्जायतेभुवि ४ संध्या
दिग्दाहवाताभ्रशक्रचापतमांसिच परिवेषश्चकेतुरंत
रिक्षमुदाहृतं ५ स्थावरेजंगमेचैवयद्भौमंचोपजायते तदेक
देशिकंप्राहुरुत्पातागमवेदिभिः ६ हैमान्नगोमहीदानैर्दि

यंशांतिमुपैतिच रुद्रजपोमोचगोदोहः कोटिहोमस्तथैवच ७ गोस
हस्रंतलोदघ्नांकुरैवदक्षिणान्वितं विधिरेषसमादिष्टोदिव्यारि
ष्टविनाशके ८ गायत्र्यालक्षहोमंतु भौमेरिष्टे विदुर्बुधाः र
त्नकांचनशय्यानांवाजिवारणवाससां ९ दानंदेयंचविप्रेभ्यो
महीदानंविशेषतः गुरवेसंप्रदातव्यं भौमारिष्टोपशांतये
१० अंतरिक्षाश्रयोत्पातविधिरेषप्रकीर्तितः विशेषात्तु
गायत्र्यादशलक्षंतुहोमयेत् ११ केतूनांचसहस्रेतुकंब
लानांशततंतथा घृतस्वर्णसमायुक्तंदद्याद्विदेन्नृपः १२
अर्यमाद्यानिचत्वारिनक्षत्राण्यश्विनीतथा आदित्यंमृग
शीर्षंचमंडलंवायुसंज्ञकं १२ यद्यस्मिन्भूमिकंपाद्यंस्या
त्तद्दोषविधिंचयः श्वासकासज्वरोन्मादाभवंतिवणिजांक्ष

य: १४ वैद्यभूपालचास्त्रलकविस्त्रीशिल्पजीविन: गंधर्वा
श्चैवपीड्यंते सौराष्ट्रकुरविंन्नरा: १५ मगधाश्चदशार्ण
श्चमत्स्यदेशास्तथैवच वायुर्वातिमहाघोरसंग्रमस्तुमहोत्क
ट: १६ स्वल्पवारिप्रदामेघा: प्रजानाशंप्रयांतिच पांचा
लसुरसेनाश्चसैन्यवाम्लेछबर्बरा: १७ ओंड्राश्चद्रविडा
श्चैवकार्णाटामानुषास्तथा नश्यंतिचनसंदेह: सेसाद्
न्यंतेरसति १८ कृत्तिकाचविशाखाचभरणीगुरुमंतथा
भाग्याजपित्तसंज्ञानि प्राहुर्वैवन्हिमंडलं १९ यद्यस्मिन्क
श्चिदुत्पातो जायते त्रिविध: खलुतत्रसलिलनाशा: स्याल्लो
काव्याधिभिरन्विता: २० नृपा: संग्रामनिरता: दुर्भिक्षंदारु
णंभवेत्: चौरवन्हिभयंचैवतथाशास्त्रभयंमहत् २१ क

३३

२४

लिंगाश्मकवाल्हीकावंगद्रविणलक्ष्मणाः सैंधवायामुनाश्चैवकाश्मी
रंचोत्तरापथं २२ एतेदेशाविनश्यंतिह्यस्मिन्नुत्पातदर्शने
अभिद्रोहिणीज्येष्ठाधनिष्ठाविष्णुभंतथा २३ वैश्वदेवंचमैत्रं
चशाक्रमंडलमीरितं बहुदुग्धप्रदागावोबहुपुष्पफलद्रुमाः
२४ प्रजाश्चैवाभिनंदंतिधनधान्ययुताधरा पाणिप्रस्थंकु
रुक्षेत्रंमगधश्चकिरातकाः २५ काश्चीमद्राभिसाराख्यौ
मालवाच्युतपारवाः विनश्यंतिनसंदेहोऽस्मिन्नुत्पातद
र्शने २६ मूलाहिर्बुध्न्यवरुणाः पौष्णाप्यार्द्राहिदैवतंवा
रुणंमंडलंप्राहुःपापघ्नंशुभप्रदं २७ सरिन्नीराश्रितान्
देशान्हंतिवारिपरंमदं अन्योन्यप्रीतिजनकंबहुसस्यक
रंस्मृतं २८ शैलजाःसागराः कीरकाश्मीरोदुंबरास्तथा

२४

सुक्का॰

अहिछत्रं च सौराष्ट्रं तथा माहिष्मतीपुरी २९ विनश्यंति न संदेहो
वारुणे स्यात दर्शने = आग्नेये वासंस्ते प्रथित नरपतिर्याति नीरो चेलो
कादुः रवेश्च्यातीव लोकोजनपदमरणं वह्निकोपोन्नसाराः चाक्का
रव्य वारुणौ वै भवन्ति च वसुसस्यलोपाभिपूर्णा लोकाश्च्यानरयुक्ताः
सकलनृपगणस्य क्वैवैरा भवंति ३० तृतीये न्हि चतुर्थे वासस
मेदिवसे थवा मासे पक्षे त्रिपक्षे वा भूमिकंपोन्नपापहः ३१ ष
दुर्मासे श्चैभूकंपो ह्यो भ्यां निर्घातदरिद्राद रिद्रतः फलदो मुनिभिः
प्रोक्ता उस्याताह्यु परेखलु ३२ आग्नेयमंडलफलं दशमासे प्रको
र्तितं द्वित्रिभ्यां चैव मासाभ्यां फलं वायोः प्रकीर्तितं ३३ वारुणस्य
कमासेन दिनैः सप्तभिरैंद्रं अन्हि प्रदृश्यते तारा रजन्यो मेढ्वचा
पके ३४ रवेचोल्कावा प्रदृश्यते तद्देशो भंगोन्नपक्षयः इति
अथ दिग्दाहः पीतवर्णो दिग्दाहो राज्ञश्च भयकृन्म

तः देशोदावह्निवर्णश्चूर्णकः सस्यविनाशकः ३६ सूर्यतेजः प
तीकाशोन्नृपाणां भयदामतः रुधिराभः शस्त्रकोपं प्रकरोति न
संशयः ३७ पूर्वस्यां नृपतीन्हंति वन्हो शिल्पिकुमारकाः या
म्ये चोग्रगणान्नैरृत्यां नारीदूतांश्च राक्षसे ३८ वारुण्यां कर्ष
कांश्चैव वाते चौरान्ससैघोटकान् उत्तरस्यां द्विजगणान् दिग्दा
हः शैवके शवान् ३९ वियत्प्रसतं विमलाश्चतारा काम्ययोति
वाताः शुभदाः प्रदक्षिणं दाहो दिशां स्वर्णनिभो नृपाणां तथा
हि लोकस्य शुभः प्रदिष्टः ४० अथोल्का उल्कातराशनिर्वि
द्युधिष्ण्या चोल्का च पंचधा मुनिभिश्च समाख्याता पक्षेकेन
फलप्रदा ४१ उल्का धिष्ण्याश्चिभिः पक्षैरशनिश्च फलप्रदाः
विद्युत्सड्भिरहोभिः स्यात्तद्वत्तारा द्विपाकदा ४१ तारानिपाकफ

ला प्रोक्ता धिष्ण्याख्यार्द्धफलप्रदा संपूर्णफलदा विद्युदुल्कास्या
द्वानिस्तथा ४२ विदार्यन्भूमिं पतिता स्वनेनेन महताशनि नृ
गजयोर्वाजिवृषयोर्गेहेषु तरुजातिषु ४३ जनयेहजने विद्यु
द्वृक्षो लटतटस्वना पतंती धनजीवेषु चलिता वह्निसंन्निभा
४४ दीप्तांगारनिभा धिष्ण्या स्वल्पपुच्छा महाहस्त्वा द्विपंचध
नुषोदृश्यास च हस्तद्वयामिता ४५ एकहस्तमिता ताराशुक्ला
तं तु स्वरूपिणी तिर्यगूर्ध्वमधो भूमिं मोहयंती प्रयाति च ४६ उ
ल्का मस्तकविस्तीर्णा पुच्छदेशे महाहस्तेन पतंती दीर्घा भवति
ने दस्तस्या स्त्रनरित्रा: ४७ गोधाहिध्वजरूपाया कपिले ला
स्वरूपिणी फलनोष्ट समायायायायास्याज्योभेयमस्तका ४८
ध्वजमीनेंदुपद्मा भागिरिहंसगजप्रभा शुभ्रस्वस्तिकरूपा

जगतः शिवप्रदा ४९ निपतंत्योंबराद्रक्तो नृपराष्ट्रभयावहाः धूमं
त्वेवयदाकाशेसाविभ्रमकरामता ५० सेस्पर्शंती चोत्थितायादिवाक
रसुधाकरौ दुर्भिक्षावृष्टिभयदा नृपविग्रहकारिका ५१ राजराष्ट्रभ
यंधत्ते पतिताप्रतिमासुच ध्वजोपरि नृपान्हंति गृहे तत्स्वामिनोभ
यं ५२ चैत्यवृक्षे सहस्रीडांपुरद्वारिपुरक्षयं करोत्युल्का चपतिता
गोष्ठे वेगोमलंभयं ५३ अथपरिवेषः शीघ्रंविलीयते यस्तुपरि
वेषोल्पपापकृदः क्षीरविक्षारजलाभश्च स्निग्धो वृत्तः शुभप्रदः ५४
रूक्षो रुधिरसंकाशो गोस्त्रिकोणः शकटाकृतिः समस्ताकाशसंचा
रिनैकाभः कष्टदायकः ५५ सुस्निग्धगंधः पीतवर्णश्च स[illegible]वारि
प्रदो मतः अहर्निशं प्रतिदिनं परिवेषो नृपापहः ५६ संध्यासु चोत्थि
तो दीर्घस्तडिदुल्काहतो यदा तदा निहंति नृपतिं शरीरे शस्त्रलाभं च

×भौमोराजसुतंहंतिवन्हिकोपंकरोतिच×

५७ हिमंडलस्थमन्नाथंहंतिवन्हिप्रकोपदः त्रिप्रभृतिमहीपालंपु
रग्रामवरोधिकः ५८ मंडलांतर्गतोमंदस्तदृश्युद्माधिकरोमतः
रविचंद्रात्रिपरिवेषेपूर्वयामेचपीडारविचंद्रात्रिपरिवेषेमध्यमेचातिव्य
थिः रविचंद्रात्रिपरिवेषेधान्यनाशोस्तलयेरविचंद्रात्रिपरिवेषेराष्ट्रभं
गंचतुर्थे ५९ राज्ञःपुरोहितान्जीवोबुधःशुभफलप्रदः ६० नि
हंतियायिनांशुक्रोमहाभयकरःशिखी राहुश्चगर्भ[illegible]त्रांचकरो
तिदुःखंचनृपानां ६१ युद्धंभवसविरलंपरिवेषोभ्यंतरेद्वयोर्ग्रह
योः ६२ अनावृष्टिंचदुर्भिक्षंमंडलांतर्गतेत्रिषु चतुर्षुप्रभिनयं
विंद्यात्सकुटुंबस्यभूपतेः ६३ भवंतिमंडलस्थावैयदापंचापिखे
चराः जगतःप्रलयंविद्धितस्मिन्कालेनसंशयः ६४ विप्रराज
न्यविट्शूद्रान्हंतिप्रतिपदादिषु श्रेणीपुरंलोकपालान्पंच

३७

चम्यादितिथिष्वपि ६५ अष्टम्यांतुवराजंपरतस्त्रिषुमहीपतीन्
हंति द्वादस्यांपुरोधसंसैन्यनाशंत्रयोदस्यां ६६ नृपपत्नीं चतुर्द
श्यांपंचदश्यांचनृपतिं परिवेषोनिहंत्याशु चेद्रूस्यग्रहोत्थितः
६७ इतिपरिवेषः सुस्निग्धंपूर्णंविविधाकारंधनुःसुरेशस्य
दोषोत्थितंप्रशस्तंकरोतिधात्रीजलछिन्नां ६८ वारिमध्येत्वना
वृष्टिंनुविसस्यविनाशनं व्याधिंतुसन्निंतरोदृष्टिंवल्मीकेशा
स्त्रजंभयं ६९ राज्ञोसेनापतिवधंधनुरैंद्रंकरोतिकिं वृष्टि
रोधंचपूर्वस्यांपश्चिमायांजलप्रदं ७० याम्यादिदिक्षुसं
भूतंमंत्रिणोभयकारणं यस्यांदिक्षूदयंयाति धनुराखंडल
स्यच ७१ तद्दिक्संभूतभूपानांशत्रुतोभयकारकं तथात
त्रसभूपालान्नरोत्तौहंतिनसंशयः ७२ इतिइंद्रायुधलक्षणं

३७

40

पुरोहितन्नृपामात्ययुवराजविनाशकं सोम्यादिदृष्टं खपुरं विनिहंति
नसंशयः ७३ श्वेतवर्णं द्विजान्हंति राजन्यानरुणप्रभं हरिद्राभं
वैश्यगणान् कृष्णवर्णं च शूद्रकान् ७४ शांताशायां च खपु-
रं दृष्टं भूपजयावहं भयदं नृपराष्ट्राणां सर्वदिक्षु समुत्थितं
७५ आपांडुरं वातकरं प्रदिष्टं प्रदीप्तवर्णं नृपमस्कंदं मतं अ-
नेकवर्णाकृति खे प्रकाशते पुरं तदा मुंडविभूषिता धरा ७६
इति खपुरं नृपतिं धनिनो वैश्यान् शूद्रानथवणिग्जना-
न् सर्पादयो विनिर्घातो विनिहंति नसंशयः ७७ निहंति यामे
प्रथमे शूद्रान्चोरगणांस्तथा राजोपजीवितो विप्रान् द्वितीये प्र-
हरे खलु ७८ तृतीये वैश्यजलदान् चतुर्थे तस्करास्तथा सं-
ध्यायां नीचजातीश्च निर्घातो हंति नान्यथा ७९ निशायाः

पथमे यामे सस्यानि विनिहंति च द्वितीये राक्षसगणं स्तृतीये ग
जवाजिनो ८० चतुर्थे यायिनो भूपान् विनिहंति न संशयः य
स्यां याति च निर्घातस्तां दिशं विनिहंति च ८१ इति निर्घातः
विनानिमित्तं चलनं च भंगः खेदागमो जल्पनमश्रुपातः देवस्य
वा देवगृहस्य नृपा विनाशमाप्नोति च देशभंगः ८२ इंद्रध्वजा
सनशारक्ष्यतोरणानां भंगश्च भूपभयदः खलु देशहास्या
त् पिश्रोर्त्रिधर्मकमलासनवैह्लतो लिघ्नंति द्विजान् सकल
लोकगणान् स्वभूत्थं ८३ शिवोत्थं भूपतिं हंति तद्गुणोत्थं पश्च
नपि पुरोधसं गुणोत्थं वैस्कंदजं क्षुद्रभूपतीन् ८४ मांडलि
कं विशाखोत्थं व्यासोत्थं मंत्रिणं तथा वैनायकं च भूनाथं वै
पुजं च प्रजास्तथा ८५ देवपुत्रकुमार्युत्थं वनिताप्रेष्य वैह्लतं

राजपुत्रंकुमारींचहंतिपत्नींतथास्त्रितां ८६ सर्वेषांफलपा
कस्यमासैरष्टभिरीरितः देवताविकृतिंबुध्वाशुचिःख
लुपुरोहितः ८७ प्रतिमांस्थापयित्वातुपूजयेत्कुसुमैःशुभैः
श्च गंधैर्धूपैर्दीपैश्चभक्ष्याछादनकैस्तथा ८८ स्थालीपाकेश्च
विधिवत्तन्मंत्रैश्चहोमयेत् सप्तरात्रंततोविप्रान्भोजयेच्च
समाहितः ८९ महोत्सवंप्रकुर्वीतदत्वास्वर्णंविसर्जयेत्
एवंकृतेतदाराजाकल्याणंमहदाप्नुयात् ९० अनग्निरेत्रो
ज्वलनंप्रदृश्यतेवह्निर्यदानेधनवान्प्रदीप्यते तदास्तुराष्ट्र
स्यस्तुवाहनस्यकरोतिनाशंमनुजेश्वरस्य ९१ अदृष्टव्य
न्नपान्हंतिशस्त्रसंग्रामसूचकः परचक्रागमंगेहेष्वेवह्नि



२६

गृहादिषु ९२ अनग्निदेशे धूमः स्याद्वृद्धियद्वह्निसमाकुलं र
जसा तमसा वा पि तद्वा लोकाभयार्दिताः ९३ वेपनं सर्पनं चैव
कोशानिः सहरणं तथा यदा भवति शाख्यस्य तदा युद्धं समादिशे
त् ९४ होतव्यं चाज्यसंमिश्रैः समिद्भिः क्षीरभूरुहां सर्षपैर्वह्नि
मंत्रैश्च देयं विप्राय कांचनं ९५ वल्याद्विविकृते शांति एवं वि
हद्विरीरिताः शाखाभंगे च विषाणे रणे भंगे समादिशेत् ९६
हसिते देशविभ्रंशो नुदिते व्याधितो भयं बहुपुष्पे बालवधं
क्षीरस्रावे धनक्षयं ९७ वाहनानां विनाशं च मद्यस्रावप्रकी
र्तितं शोणिते च महायुद्धं बहुस्रावे महागदं ९८ स्नेहस्रावे
चदुर्भिक्षं जलस्रावे महद्भयं शोषणे सस्यनाशः स्यात्तथाश्रु

२६

क्षुप्ररोहणे ९९ पतितानांसमुत्थाने महाभयमुदीरितं अन्य
तौ च फले पुष्पे नाशः स्यात्पृथ्वीपतेः १०० धूमायमाने ज्वलि
ते विरुते नृपतेर्वधः सर्पणे जल्पने चैव लोकानां क्षयमा
दिसेत् १ वृक्षाणां विरुते सप्तदशमासैः फलं स्मृतं
स्वर्णपुष्पांबरभूषितं च निधायतस्योपरि चालेपत्रं वृक्ष
स्यतस्यैव शिवस्य मूर्तिः कृत्वाथ पूजादिजपः प्रकार्यः २
हुत्वा वन्हिं ब्राह्मणान्भोजयित्वा मध्वाज्योत्थैः पायसैः खं
डमिश्रैः दद्याद्धेनुं कांचनं पट्टवस्त्रं वृक्षोत्पाते शांतिरेषाप्र
दिष्टा ३ नाले चक्षुर्यदा नासे कस्मिन्नुत्विसंभवे फले
वा कुसुमे वापि मस्तके तत्स्वामिनां तथा ४ अतिवृद्धौ च स

स्यांनाषन्चक्रागमं वदेत् यदाचान्नस्यवैरस्यंतदाविंद्यान्महद्भयं
अद्दैनचयदातैलंतिलानांचोपजायते अतैलवान्नीभवतिभयंवि
घाद्धिचक्षणः ६ वैकृतंचफलंपुष्पंवहिःकार्यमुरात्ततः बहुः
कार्योथसौम्यात्रशांत्यैनिर्वपनेपरोः ७ सस्येचवृष्याविहतिं
क्षेत्रंदधाद्धिजायते क्षेत्रमध्येभौमगुरुंकुर्यात्तद्दोषशांतये ८
अनावृष्टौचेद्दुर्भिक्षंअतिवृष्टौहिदुःक्षयं अन्नलौभयतावृष्टि
व्यैन्नेहंतिमहीपति ॥ ९ ऋतोर्विपर्ययेरत्राभंगोरोगाभवंतिच
प्रचंडवृष्टौससाहमनलोनृपतेर्वधः १० रक्तवर्षेचसंग्राममा
रीमांसवसादिषु महाभयंचविलयंस्वर्णधान्यफलादिभिः ११
पांसुवर्षेतथांगारे नगरस्यचसंक्षयं अनभ्रेचहूषःवृष्टिः ह्रल
नास्यागमंवदेत् १२ नदृश्यतेयदाछायादृश्यतेवाप्रदीपगा तदा

भयंसमोद्भवंलोकानांचविनिश्चितं १३ यदींदुचापंनभशीप्र
दृश्यतेव्यत्रैचरात्रौयदिवाविलोक्यते तदाभयंस्यादचिरेणभूभुजां
समस्तलोकस्यपुरस्यनिश्चितं १४ सूर्येंदुवानमेघानांयोगःका
र्यः पुरोधसा सस्यंगोकांचनंदेयंपापंनश्यतिरष्टिजं १५ शून्ये
करोतिनगरान्नदीनामपसर्पणं शोषश्चाशोष्यजालानांह्रदादी
नांतथैवच १६ सरितोस्त्रोतसंवहामलयुक्ताःप्रतीपगाःय
दाभवंतिषण्मासात्परचक्रागमंवदेत् ७ कूपमध्येमहाज्वा
लाभूमौवायदिदृश्यते रोदनेवकनेगीतेलोकानांवधमादिसेत्
१८ अवारिदेशेसलिलप्रवृत्तिविपर्य्येयोगंधरसादिकानां
वारिप्रदेशेविद्युतिर्यदास्यान्महद्भयंशत्रुकृतंवदेत्तदा १९ व
रुणस्यवारुणैर्मंत्रैःकुर्याद्धोमंतथार्चनं जलोत्थंनोशमायाति

३१

पापं सर्वं न संशयः २० खरण्यस्य वारणे मंत्रैः कुर्याद्धोमं तथार्च
नं ३ विकारे प्रसवे स्त्रीणां गर्भे द्वित्रादिसंभवे हीनातिरिक्तकाले
च सूतौ देशाकुलक्षयः २१ गोहस्त्युष्ट्रतुरंगाणां गर्भे द्वित्रादिसं
भवे अनिष्टं स्वामिनो वाच्यं पृथ्व्यां नगरस्य च २२ कर्वटेतुर
गीवाह्निमहिषीमद्यारे निशि सिंहगावः प्रसूयंते मस्तकः स्तनस्वा
मिनोर्भवेत् २३ त्यक्तव्याः परदेशेषु योषितश्चाहितार्थिनी
दानं देयं च विप्रेभ्यः शांतिं चैवात्र कारयेत् २४ चतुष्पदः स्व
यूथेभ्यः त्यक्तव्याः परभूमिषु ब्राह्मणाय प्रदातव्याः परदेशा
स्थितायैव २५ परयानोतिरथ्यांवेगमनं च यस्य भवेत् मास
चयणे देवैः परचक्रागमं वदेत् २६ स्नानं विवसनं दानं तस्य
कार्यं विपश्चिता स्थालीपाकेन धातारं पशुना च पुरोहितः २७

३१

प्राजापत्येनमंत्रेणैयजेद्बहून्नदक्षिणैः २८ सवाहनंयाति
यदानयानंप्रयातिवाहनंयदावराञ्चितं शब्दोनतूर्यैर्यदिताडि
तैस्यात्तदामहीपस्यविध्वंसमादिशेत् २९ अनभिहततूर्यैर्ना
दः संग्रामभयंकरोतिनृपस्य गीतरवतूर्यशब्दानभवतितदा
मत्स्यरादेशः ३० गोलांगलयोः स्पर्शेतदाद्व्याधुपस्करे वि
कारेसंप्रवक्ष्येचास्त्रेषुनादेस्त्रजंभयं ३१ उत्पातेवासजेरा
ज्ञावातंसस्तुभिराज्यच आवायोइतिपंचर्द्धीसत्व्यः प्रयत्ने
द्विजैः ३२ भोजयित्वाद्विजवरान् दक्षिणाभिश्चतोषयेत्
विशेषतश्चकर्तव्योहोमोबह्वन्नदक्षिणः ३३ पुरस्थाः
पाक्षिणोयांतियनंचवनवासिनः पुरंविशंतिनिःशंकाः
स्तदावाच्यंमहद्भयं ३४ यदादिवाचरान्नक्तं दिवसेरजनी

49

५६ ५५ । १२ । २७

३२ चराः संचरंति च दीप्तायां पक्षिणश्च मृगादिशि ३५ द्वारदेशे
रुदंतश्च श्येनाः क्रोशंति जंबुकाः कपोताः कौशिको वाथ
प्रविशेद्राजमंदिरे ३६ प्रदोषे कुक्कुटो रुतं हेमंते कोकिलस्व
नाः विलोममंडलचराः श्येनाद्याः स्वांबरे यदा ३७ यउच्चे
स्यतोरणेषु द्वारदेशेषु पक्षिणः विशंति मधुवल्मीककमला
नां समुद्भवाः ३८ प्रासादवस्तुधातुल्स निम्नेषावासकं यदि
काकाः कुर्वंति नाशः स्यात्तद्देशश्च विनिश्चितं ३९ यदा
श्वास्थि वसामांससंश्चावस्यादाय मंदिरे प्रविशेद्रुतव्याहारस्तदा
राज्ञो वधो मतः ४० मृगपक्षिविकारेषु प्रयोगः कार्यः सदक्षि
णः देवाः कपोत इति च जप्तव्यं पंचभिर्द्विजैः ४१ सुदेवा इति ३२

KKSU LIBRARY
RAMTEK
441 106
M-1801
Dist. Nagpur

```
[OrderDescription]
,CREATED=20.10.20 15:37
,TRANSFERRED=2020/10/20 at 15:43:53
,PAGES=50
,TYPE=STD
,NAME=S0004244
,Book Name=M-1801-SHATPACHHSHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,
```